प्रदोषस्तोत्राष्टकं

प्रदोषस्तोत्राष्टकं

सत्यं ब्रवीमि परलोकहितं ब्रवीमि
सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि |
संसारमुल्बणमसारमवाप्य जंतोः
सारोऽयमीश्वरपदांबुरुहस्य सेवा || 1 ||

ये नार्चयंति गिरिशं समये प्रदोषे
ये नार्चितं शिवमपि प्रणमंति चान्ये |
एतत्कथां श्रुतिपुटैर्न पिबंति मूढा-
-स्ते जन्मजन्मसु भवंति नरा दरिद्राः || 2 ||

ये वै प्रदोषसमये परमेश्वरस्य
कुर्वंत्यनन्यमनसोंघ्रिसरोजपूजां |
नित्यं प्रवृद्धधनधान्यकळत्रपुत्र-
-सौभाग्यसंपदधिकास्त इहैव लोके || 3 ||

कैलासशैलभवने त्रिजगज्जनित्रीं
गौरीं निवेश्य कनकांचितरत्नपीठे |
नृत्यं विधातुमभिवांछति शूलपाणौ
देवाः प्रदोषसमयेऽनुभजंति सर्वे || 4 ||

वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मज-
-स्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता |
विष्णुः सांद्रमृदंगवादनपटुर्देवाः समंतात् स्थिताः
सेवंते तमनु प्रदोषसमये देवं मृडानीपतिं || 5 ||

गंधर्वयक्षपतगोरगसिद्धसाध्या
विद्याधरामरवराप्सरसां गणांश्च |
येऽन्ये त्रिलोकनिलयाः सहभूतवर्गाः
प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः || 6 ||

अतः प्रदोषे शिव एक एव
पूज्योऽथ नान्ये हरिपद्मजाद्याः |
तस्मिन्महेशे विधिनेज्यमाने
सर्वे प्रसीदंति सुराधिनाथाः || 7 ||

एष ते तनयः पूर्वजन्मनि ब्राह्मणोत्तमः
प्रतिग्रहैर्वयो निन्ये न यज्ञाद्यैः सुकर्मभिः |
अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि
तद्दोषपरिहारार्थं शरणं यातु शंकरं || 8 ||

इति श्रीस्कांदपुराणे ब्रह्मखंडे तृतीये ब्रह्मोत्तरखंडे षष्ठोऽध्याये शांडिल्य कृत प्रदोषस्तोत्राष्टकं |